च। तेषां न च रजो वस्त्रं बाधते तत्र वै मुने!। न म्लायन्ति स्रजस्तेषां दिव्यगन्धा मनोरमाः। संयुज्यन्ते विमानैश्च ब्रह्मन्नेवंविधैश्च ते। ईर्षाशोकक्लमापेता मोहमात्सर्य्यवर्जिताः। सुखं स्वर्गजितस्तत्र वर्त्तयन्ति महामुने!। तेषां तथाविधानान्तु लोकानां मुनिपुङ्गव!। उपर्य्युपरि लोकस्य लोका दिव्या गुणान्विताः। पुरस्ताद् ब्रह्मणस्तत्र लोकास्तेजोमयाः शुभाः। यत्र यान्त्यृषयो ब्रह्मन्! पूताः स्वैः कर्मभिः शुभैः। ऋभवो नाम तत्रान्ये देवानामपि देवताः। तेषां लोकाः परतरे यान् यजन्तीह देवताः। स्वयम्प्रभास्ते भास्वन्तो लोकाः कामदुघाः परे। न तेषां स्त्रीकृतस्तापो न लोकैश्वर्य्यमत्सरः। न वर्त्तयन्त्याहुतिभिस्ते नाप्यमृतभोजनाः। तथा दिव्यशरीरास्ते न च विग्रहमूर्त्तयः। न सुखे सुखकामास्ते देवदेवाः सनातनाः। न कल्पपरिवर्त्तेषु परिवर्त्तन्ति ते तथा। जरा मृत्युः कुतस्तेषां हर्षः प्रीतिसुखं न च। न दुःखं न सुखञ्चापि रागद्वेषौ कुतो मुने!। देवानामपि मौद्गल्य! काङ्क्षिता सा गतिः परा। दुष्प्रापा परमा सिद्धिरगम्या कामगोचरैः। त्रयस्त्रिंशदिमे देवा येषां लोका मनीषिभिः। गम्यन्ते नियमैः श्रेष्ठैर्दानैर्वा विधिपूर्वकैः। सेयं दानकृता व्युष्टिरनुप्राप्ता सुखं त्वया। तां भुङ्क्ष्व सुकृतैर्लब्धां तपसा द्योतितप्रभः। एतत् स्वर्गसुखं विप्र! लोका नानाविधास्तथा। गुणाः स्वर्गस्य प्रोक्तास्ते दोषानपि निबोध मे। कृतस्य कर्मणस्तत्र भुज्यते यत् फलं दिवि। न चान्यत् क्रियते कर्म मूलच्छेदेन भुज्यते। सोऽत्र दोषो मम मतस्तस्यान्ते पतनञ्च यत्। सुखव्याप्तमनस्कानां पतनं यच्च मुद्गल!। असन्तोषः परीतापो दृष्ट्वा दीप्ततराः श्रियः। यद्भवत्यवरे स्थाने स्थितानां तत् सुदुष्करम्। संज्ञा मोहश्च पततां रजसा च प्रधर्षणम्। प्रम्लानेषु च माल्येषु ततः पिपतिषोर्भयम्। आब्रह्मभवनादेते दोषा मौद्गल्य! दारुणाः। नाकलोके सुकृतिनां गुणास्त्वयुतशो नृणाम्। अयं त्वन्यो गुणः श्रेष्ठश्च्युतानां स्वर्गतो मुने!। शुभानुशययोगेन मनुष्येषूपजायते। तत्रापि स महाभागः सुखभाग्भिजायते। न चेत् सम्बुध्यते तत्र गच्छत्यधमतां ततः। इह यत् क्रियते कर्म तत् परत्रोपभुज्यते। कर्मभूमिरियं ब्रह्मन्! फलभूमिरसौ मतः"। स च लोको भूरादिषु ऊर्द्धस्थस्तृतीयः।

**स्वर्गङ्गा** स्त्री इत॰। मन्दाकिन्यां शब्दर॰।

**स्वर्गनाथ** पु॰ इत॰। इन्द्रे स्वर्गपत्यादयोऽप्यत्र हेमच॰।

**स्वर्गवधू** स्त्री इत॰। अप्सरःसु हेमच॰।

**स्वर्गाचल** पु॰ स्वर्गलोकस्थोऽचलः। सुमेरुपर्वते स्वर्गगिर्य्यादयोऽप्यत्र हेमच॰।

**स्वर्गिन्** पु॰ स्वर्गोऽस्त्यस्य भोग्यत्वेन इनि। १देवे त्रि॰ २देवलोकगामिनि च त्रि॰ स्वर्गगामित्वसूचकगुणभेदा गरुड़पु॰ उक्ता यथा "समाभूतेषु संवादः परलोकं प्रति क्रिया। सतां परहिताः योक्तिर्वेदप्रामाण्यदर्शनम्। गुरुदेवर्षिपूजा च वीतलं साधुसङ्गमः। सत्क्रियाभ्यसनं मैत्री स्वर्गिणां लक्षणं विदुः"।

**स्वर्गौकस्** पु॰ स्वर्ग ओको यस्य। देवे हला॰।

**स्वर्जिक** पु॰ सु+अर्ज–घञ् ततः अस्त्यर्थे ठन्। सर्जिकाक्षारे राजनि॰ २यवक्षारे स्त्री भावप्र॰।
"कथितः स्वर्जिकाभेदः विशेषज्ञैः सुवर्चिका। यवक्षारो लघुः स्निग्धः सुसूक्ष्मो वह्निदीपनः। निहन्ति शूलं वातामस्लेष्मश्वासगलामयान्। स्वर्जिकाल्पगुणा तस्मात् विशेषात् गुल्मशूलहृत्" भावप्र॰। कर्म॰ स्वर्जिकाक्षारोऽप्यत्रार्थे राजनि॰ णिनि स्वर्जिन् तत्रार्थे राजनि॰।

**स्वर्ण** न॰ सुष्ठु अर्णो वर्णो यस्य। १काञ्चने २धुस्तूरे अमरः ३नागकेशरे ४गौरवर्णशाके च राजनि॰। सुवर्णशब्दे दृश्यम्। [राजनि॰] इत॰ २सुवर्णस्य लेशे पु॰।

**स्वर्णकण** न॰ स्वर्णमिव पीतत्वात् कणोऽस्य। १कणगुग्गुलौ

**स्वर्णकदली** स्त्री स्वर्णमिव कदली (चाँपाकला) कदलीभेदे।

**स्वर्णकाय** पु॰ स्वर्णमिव पीतत्वात् कायोऽस्य। १गरुड़े हेमच॰। २स्वर्णवर्णदेहयुते त्रि॰।

**स्वर्णकार** पु॰ स्वर्णं स्वर्णमयमलङ्कारादि करोति कृ–अण्। (सेकरा) जातिभेदे। "विश्वकर्मा तु शूद्रायां वीर्य्याधानं चकार सः। ततो बभूवुः पुत्राश्च नवैते शिल्पकारिणः। मालाकारः कर्मकारः शङ्खकारः कुविन्दकः। कुम्भकारः कांस्यकारः षडेते शिल्पिनां वराः। सूत्रधारश्चित्रकरः स्वर्णकारस्तथैव च। पतितास्ते ब्रह्मशापादयाज्या वर्णसङ्कराः। स्वर्णकारः स्वर्णचौर्य्यात् ब्राह्मणानां द्विजोत्तम!। बभूव सद्यः पतितो ब्रह्मशापेन कर्मणा" ब्रह्मवै॰ ब्र॰ख॰ १०अ॰। "तैलचौरस्तैलकीटो मूर्ध्नि कीटस्त्रिजन्मकम्। ततो भवेत् स्वर्णकारो जन्मैकं दुष्टमानसः" ब्रह्मवै॰ जन्मख॰ ८५ अ॰। तज्जातिलाभकर्म।

**स्वर्णकृत्** पु॰ स्वर्णं तन्मयभूषादिकं करोति कृ–क्विप्। स्वर्णकारे शब्दमा॰।